## दाधेट्सिशदसदो रुः । (१५९/३१३९)

[1]दा धेट् सि शद सद इत्येतेभ्यः[2] रुः प्रत्ययो भवति। दारुः। [3]धारुर्वत्सो मातरम् 'न लोकाव्ययनिष्ठा[4]खलर्थतृनाम्' (२.३.६९/६२७) इति उकारप्रश्लेषात् षष्ठी न भवति। [5]सेरुः। शद्रुः। सद्रुः ॥

## सृघस्यदः क्मरच् । (१६०/३१४०)

सृ घसि अद इत्येतेभ्यो [6]धातुभ्यः [7]तच्छीलादिषु कर्तृषु क्मरच् प्रत्ययो भवति। सृमरः। घस्मरः। अद्मरः ॥

## भञ्जभासमिदो घुरच् । (१६१/३१४१)

भञ्ज भास मिद इत्येतेभ्यो घुरच् प्रत्ययो भवति [8]तच्छीलादिषु कर्तृषु। भङ्गुरं काष्ठम्। [9]घित्वात कुत्वम्। भासुरं ज्योतिः। मेदुरः पशुः। [10]भञ्जेः कर्मकर्तरि प्रत्ययः, स्वभावात् ॥

## विदिभिदिच्छिदेः कुरच् । (१६२/३१४२)

ज्ञानार्थस्य विदेः (धा. पा. १०६५) ग्रहणं न [11]लाभार्थस्य (धा. पा. १४३३), स्वभावात्। विदादिभ्यो [12]धातुभ्यः [13]तच्छीलादिषु कर्तृषु कुरच् प्रत्ययो भवति। विदुरः पण्डितः। भिदुरं काष्ठम्। छिदुरा रज्जुः। [14]भिदिच्छिद्योः कर्मकर्तरि [15]प्रयोगः।

[२८२] [16]व्यधेः सम्प्रसारणं कुरच्च वक्तव्यः।

विधुरः ॥

## इण्नश्जिसर्तिभ्यः क्वरप् । (१६३/३१४३)

इण् नश् जि सर्ति इत्येतेभ्यो [17]धातुभ्यः तच्छीलादिषु कर्तृषु क्वरप् प्रत्ययो भवति। [18]पकारस्तुगर्थः इत्वरः। इत्वरी। नश्वरः। [19]नश्वरी। जित्वरः। जित्वरी। सृत्वरः। सृत्वरी। [20]'नेड्वशि कृति' (७.२.८/२९८१) इति इट्प्रतिषेधः ॥

---

1. दादिभ्यो धातुभ्यः अ. ब. क. फ. 2. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. फ. 3. धारुः – न भवति नास्ति ग, धारुरिव क. ड. 4. खलर्थ नास्ति फ. 5. शरुः फ, शेरुः ह. 6. धातुभ्यः नास्ति फ. 7. तच्छीलादिषु कर्तृषु नास्ति अ. क. ह. 8. तच्छीलादिषु कर्तृषु नास्ति अ. क. ह. 9. घित्वात् नास्ति ब. फ. 10. भञ्जः ह. 11. लाभार्थस्य अ. ब. क. फ. 12. धातुभ्यः नास्ति फ. 13. तच्छीलादिषु नास्ति अ. क. 14. वाक्यमिदं नास्ति ह. 15. प्रत्ययः अ. ब. क. ड. फ. 16. व्यधेः – विधुरः नास्ति अ. ब. क. ड. ह. 17. धातुभ्यः नास्ति फ, तच्छीलादिषु नास्ति ह. 18. पकारः नास्ति अ. ब. क. 19. नश्वरी जित्वरी नास्ति अ. क. 20. वाक्यमिदं नास्ति ब. क. फ. ह.